**कक्ष्या – शास्त्रिद्वितीयवर्षम् (तृतीयसत्रार्धं - चतुर्थसत्रार्धम्)**

**पत्रम् – पञ्चमपत्रम्, विषयः – प्राचीनन्यायवैशेषिकम् ,**

**ग्रन्थः – वैशेषिकसूत्रोपस्कारः(आदितः चतुर्थाध्यायान्तम्) , कूटसङ्ख्या – 1189 अ – 2189 अ**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- धर्मलक्षणं, वेदप्रामाण्यम्, अनुबन्धचतुष्टयं, पदार्थोद्देशं, द्रव्यगुणकर्मणां विभागं चावगतुं समर्थाः भवेयुः।
- द्रव्यादीनां साधर्म्य-वैधर्म्ये, द्रव्य-गुण-कर्मणां लक्षणानि, कार्ये नानाकारणकत्वं चावगच्छेयुः।
- कार्यकारणभावव्यवस्थां, सामान्यविशेषयोः लक्षणं, सत्ता-द्रव्यत्व-गुणत्व-कर्मत्वजातिसिद्धिं, सत्तायाः एकत्वव्यवस्थापनं च विजानीयुः।
- पृथिव्यादि-चतुर्णां लक्षणानि, अनुमानस्य प्रामाण्यव्यवस्थापनं, वायोरनुमानम्, ईश्वरानुमानम्, आकाशसाधकलिङ्गं च ज्ञातुं शक्नुयुः।
- पृथिवी-जल-तेजोलक्षणानां परीक्षणं, कालदिशोः लक्षणं, संशयस्वरूपं, तत्कारणं, शब्दलक्षणं, स्फोटवादपरिशीलनं च विजानीयुः।
- हेत्वाभासं, ज्ञानस्य आत्मज्ञापकत्वं, परदेहादौ आत्मनोऽनुमेयत्वं, मनोवैभववादिमतपरिशीलनम्, आत्मसंसाधकलिङ्गानि, आत्मनो प्रतिदेहभिन्नत्वं चावगन्तुं शक्नुयुः।
- परमाणुजगत्कारणतावादं, परमाणोः नित्यत्वं, परमाणोः तद्गुणानां चातीन्द्रियत्वं, गुरुत्वादेः अप्रत्यक्षत्वं, द्वीन्द्रियग्राह्यगुणान्, सत्तागुणयोः सर्वेन्द्रियग्राह्यत्वं चाधिगच्छेयुः।
- अनित्यद्रव्यविभागं, शरीरस्य चातुर्भौतिकत्व-पाञ्चभौतिकत्वयोः निरासं, शरीरविभागं, देहस्य भूतत्रयानारब्धत्वं ,अयोनिजशरीरे प्रमाणं च विजानीयुः।